दशमः पाठः

कृषिकाः कर्मवीराः

सूर्यस्तपतु मेघाः वा वर्षन्तु विपुलं जलम्।
कृषिका कृषिको नित्यं शीतकालेऽपि कर्मठौ ।।1।।

ग्रीष्मे शरीरं सस्वेदं शीते कम्पमयं सदा।
हलेन च कुदालेन तौ तु क्षेत्राणि कर्षतः ।।2।।


पादयोर्न पदत्राणे शरीरे वसनानि नो।
निर्धनं जीवनं कष्टं सुखं दूरे हि तिष्ठति ।।3।।

गृहं जीर्णं न वर्षासु वृष्टिं वारयितुं क्षमम्।
तथापि कर्मवीरत्वं कृषिकाणां न नश्यति ।।4।।

तयोः श्रमेण क्षेत्राणि सस्यपूर्णानि सर्वदा।
धरित्री सरसा जाता या शुष्का कण्टकावृता ।।5।।


शाकमन्नं फलं दुग्धं दत्त्वा सर्वेभ्य एव तौ।
क्षुधा-तृषाकुलौ नित्यं विचित्रौ जन-पालकौ ।।6।।





शब्दार्थाः

तपतु	–	तपाये, जलाये	may burn
विपुलम्	–	अत्यधिक	in large amount
कर्मठौ	–	निरन्तर क्रियाशील	active
सस्वेदम्	–	पसीने से युक्त	full of sweat
पदत्राणे	–	जूते	shoes
वसनानि	–	कपड़े	clothes
जीर्णम्	–	पुराना	old
वारयितुम्	–	दूर करने में	in removing
क्षमम्	–	समर्थ	able
सस्यपूर्णानि	–	फसल से युक्त	full of crops
धरित्री	–	पृथ्वी	earth
कण्टकावृता	–	काँटों से परिपूर्ण	full of thorns
क्षुधातृषाकुलौ	–	भूख प्यास से बेचैन	distressed with hunger and thirst



अभ्यासः

1. **उच्चारणं कुरुत–**

सूर्यस्तपतु	जीर्णम्	शीतकालेऽपि
वारयितुम्	ग्रीष्मे	सस्यपूर्णानि
पदत्राणे	कण्टकावृता	क्षुधा–तृषाकुलौ



2. श्लोकांशान् योजयत-

क	ख
गृहं जीर्णं न वर्षासु	तौ तु क्षेत्राणि कर्षतः।
हलेन च कुदालेन	या शुष्का कण्टकावृता।
पादयोर्न पदत्राणे	सस्यपूर्णानि सर्वदा।
तयोः श्रमेण क्षेत्राणि	शरीरे वसनानि नो।
धरित्री सरसा जाता	वृष्टिं वारयितुं क्षमम्।

3. उपयुक्तकथनानां समक्षम् 'आम्' अनुपयुक्तकथनानां समक्षं 'न' इति लिखत-

यथा- कृषकाः शीतकालेऽपि कर्मठाः भवन्ति। आम्

कृषकाः हलेन क्षेत्राणि न कर्षन्ति। न

(क) कृषकाः सर्वेभ्यः अन्नं यच्छन्ति। ☐

(ख) कृषकाणां जीवनं कष्टप्रदं न भवति। ☐

(ग) कृषकः क्षेत्राणि सस्यपूर्णानि करोति। ☐

(घ) शीते शरीरे कम्पनं न भवति। ☐

(ङ) श्रमेण धरित्री सरसा भवति। ☐



4. मञ्जूषातः पर्यायवाचिपदानि चित्वा लिखत-

रविः	वस्त्राणि	जर्जरम्	अधिकम्	पृथ्वी	पिपासा

वसनानि .....

सूर्यः .....

तृषा .....

विपुलम् .....

जीर्णम् .....

धरित्री .....

5. मञ्जूषातः विलोमपदानि चित्वा लिखत-

धनिकम्	नीरसा	अक्षमम्	दुःखम्	शीते	पार्श्वे

सुखम् .....

दूरे .....

निर्धनम् .....

क्षमम् .....

ग्रीष्मे .....

सरसा .....



6. प्रश्नानाम् उत्तराणि लिखत-

(क) कृषकाः केन क्षेत्राणि कर्षन्ति?

(ख) केषां कर्मवीरत्वं न नश्यति?

(ग) श्रमेण का सरसा भवति?

(घ) कृषकाः सर्वेभ्यः किं किं यच्छन्ति?

(ङ) कृषकात् दूरे किं तिष्ठति?

